# Annapurna Stava

# अन्नपूर्णास्तवः

## Document Information

Text title : Annapurna Stava

File name : annapUrNAstavaH.itx

Category : devii, devI, pArvatI, annapUrNA

Location : doc_devii

Proofread by : Mohan Chettoor

Description/comments : From Stotras Samahara Part 2 (ed. K.Raghavan Pillai)

Latest update : September 4, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 4, 2022

*sanskritdocuments.org*

# अन्नपूर्णास्तवः

विश्वेश्वरीं वरेण्यां विश्वाश्रयणीं विशिष्टफलदात्रीम् ।
स्तोष्यामि वाञ्छितास्यै स्तोत्रैरन्नाधिनायिकामम्बाम् ॥ १॥

काञ्चनरत्नविचित्रां दर्वीं दधतीं तथान्नपात्रं च ।
कष्टदरिद्रार्तिहरामम्बां प्रणतोऽस्मि सम्पदां वृद्ध्यै ॥ २॥

सर्वाभिलाषपूरणकल्पकलतिकान्नपूर्णाख्या ।
दारिद्र्यदोषमुग्रं शमयतु सकलार्थवृद्धिदानेन ॥ ३॥

अन्नाधिनायिकायाः कृपाघना दुःखधर्मपरितप्ते ।
मयि दारिद्र्यऋणघ्या वर्षतु धनधान्यधारया सुचिरम् ॥ ४॥

वेदादिर्भुवनाहृद्भगवति माहेश्वरीति चान्नान्ते ।
पूर्णेऽग्निवल्लभा स्यादुक्तोऽयं मनुरशेषफलदायी ॥ ५॥

गुरुकारुण्याल्लब्धं मन्त्रमिदं दिनमुखेषु भक्तधिया ।
यो जपति तस्य सिद्धिर्न दुर्लभा जायते च तापघ्नी ॥ ६॥

तव पादकमलसेवाहृतचित्तः साधकः समाहितधीः ।
तरति महाभवदुर्गं विश्रुतकीर्तिप्रभावसौभाग्यः ॥ ७॥

त्वजपपूजाध्यानप्रभेदपरिनिष्ठितात्मधीर्मनुजः ।
निःस्वोऽप्यकिञ्चनोऽपि त्रिभुवनविख्यातकीर्तिराशिः स्यात् ॥ ८॥

निधिवृन्दमध्यगां त्वां ध्यात्वा मन्त्रं यदा नरो जपति ।
देवि तदास्य निवासं विशन्ति विविधार्थपूरिता निधयः ॥ ९॥

दिव्यान्नपूर्णपात्रं दर्वीं च करद्वयेन बिभ्राणाम् ।
ध्यात्वा यदि जपति त्वां प्रपूर्यते तस्य वेश्म धान्यौघैः ॥ १०॥

यस्मिन् वसति मनुष्यस्तव मन्त्रविशेषजापको देशे ।
तत्र न दीना वाणी प्रवर्तते देवि “नास्ति नास्ती” ति ॥ ११॥

अन्नाद्रिमध्यविस्फुरदम्बुजमध्ये त्रिमण्डलान्तःस्थाम् ।
ध्यायेद्यो दारिद्र्याद्विमुच्यते साधकः स एवाशु ॥ १२॥

इन्द्राग्निसोमभास्करवरुणानिलधनदताक्ष्र्यकन्दर्पाः ।
विष्णुविरिञ्चिप्रमुखा देवास्त्वद्ध्यानसम्पदा प्रथिताः ॥ १३॥

युष्मदपाङ्गघनोऽयं प्रशमितबहुदुःखधर्मतापौघः ।
धारासारवनौघं वर्षतु मयि देवि सर्वदा कृपया ॥ १४॥

तत्र पाणिवल्लवस्था दर्वी दिव्यान्नपूरिता देवि ।
दारिद्र्यदोषमुग्रं शमयतु मम सम्पदां वृद्ध्यै ॥ १५॥

वीक्षस्व मामनेकामयदुरितदुरन्तदुःखपरितप्तम् । (परितप्ताम्)
मातर्विभूतिमय्या दिव्यामृतसारधारया दृष्ट्या ॥ १६॥

अभिनवभास्करकोटिप्रभासमुद्भासितं हि ते रूपम् ।
हृदयाम्बुजमध्यगतं देवि समाधौ भजन्ति योगीन्द्राः ॥ १७॥

आदौ सृजसि च विश्वं प्रपासि सचराचरं जगद् भूयः ।
संहरसि लोकमन्ते गुणत्रये सा त्वमेव देव्येका ॥ १८॥

मायोदधिरयमम्ब विषयग्राहोर्मिन्दारुणो भवति ।
त्वत्तापवाडवाग्नौ सोऽपि च विलयं प्रयाति तच्चित्रम् ॥ १९॥

श्रीमद्गुरुप्रसादात्तत्त्वं तव योऽभिवेत्ति लोकेऽस्मिन् ।
देवि स मनुजो लोके पारत्रिकमैहिकं शमभ्येति ॥ २०॥

हुतभुङ्मण्डलमध्ये विलसितरविबिम्बमध्यगं त्वमृतम् ।
सोमात्मकं विदित्वा देवि त्वद्भावनेन पूतः स्यात् ॥ २१॥

गुरुवरपादपवित्रीकृतान्तरात्मा प्रतापयित्वा त्वाम् ।
देवि चिदग्नौ दीप्ते योगी योगामृतं जुहोत्येव ॥ २२॥

सकृदपि युष्मद्भक्तो दिव्यामृतमम्ब भावपात्रस्थम् ।
पिबति विदित्वा सम्यग् जीवन्मुक्तः स विज्ञेयः ॥ २३॥

योगामृतपूतात्मा योगी विजितेन्द्रियारिजितसङ्गः । (सङ्घः)
नहि जननीगर्भगृहं प्रविशति योगेशि योगभावितधीः ॥ २४॥

योगी त्वयाहिधत्ते संवित्तिपदे तदैव परितुष्टिम् । (त्वयाधिधत्ते)
विधिहरिरुद्रादीनां गणयति न पदानि देव्यनित्यानि ॥ २५॥

षड्त्रिंशत्तत्त्वाख्यं शिवादिभूम्यन्तमम्ब विश्वमिदम् ।
यस्योर्मिम्बुद्बुदः स्यात् तत्ते संवित्तिमाश्रये धाम ॥ २६॥

मूलाधारनिवासा सूक्ष्मा सूर्यायुतोपमा शक्तिः ।
निर्भिद्य षड्सरोजं यान्ती या सा त्वमेव शम्भुपदम् ॥ २७॥

षोडशपत्रसरोजात् स्रवन्महाधारया सहोद्दीप्ता ।
यान्ती मूलनिवासं या हि कुळा कुण्डली त्वमेवाम्ब ॥ २८॥

जित्वा षट् पञ्च पुनर्निरुध्य दशकं तथैकमवलम्ब्य ।
देवि तव रूपमब्जे हृदयस्थे संयमी स्मरति ॥ २९॥

स्थूलं तवाम्ब रूपं योगिमनःपद्मकर्णिकासंस्थम् ।
योगविवृद्ध्यै सिद्धिं मम दिशतु समस्तवाञ्छितावाप्त्यै ॥ ३०॥

सूक्ष्मं तवाम्ब रूपं सकलजगत्त्राणकारणोद्भूतम् ।
स्तोष्ये तदेव भक्त्या वाञ्छितसिद्धिप्रदानसुरवृक्षम् ॥ ३१॥

श्रीदुर्गा वाग्देवी गिरिजा लिपिमातृका च मातङ्गी ।
त्रिपुरा तथान्नपूर्णा राज्या रमा चेति कीर्तिता मुनिभिः ॥ ३२॥

वाग्देवीं वागाप्त्यै दुर्गां भयशान्तये श्रियं भूत्यै ।
आराधयति मनुष्यः पुरुषार्थचतुष्कलब्धये त्रिपुराम ॥ ३३॥

बहुरूपधारिणीं त्वां बहुधा प्रवदन्ति मानवा लोके ।
गुरुमन्त्रदेवतात्मस्वरूपिणीं भावयाम्यहं त्वेकाम् ॥ ३४॥

कथमम्ब रूपमाद्यं तव रूपगुणाधिकं च चिन्मात्रम् ।
जानामि देवि तस्माद् दुरुक्तमीशि क्षमस्व तत् सर्वम् ॥ ३५॥

दारिद्र्यदुरितदुःखप्रशान्तये व्याहृतं मया स्तोत्रम् ।
देवि सदा तं जपतां भक्तानां भवतु कामधेनुरिदम् ॥ ३६॥

स्तोत्रेण त्वं तुष्टा मयोदितेन प्रभूतधनधान्यैः ।
पूरय वेश्म मदीयं विधेहि मयि सन्निधिं प्रपद्ये त्वाम् ॥ ३७॥

इति अन्नपूर्णास्तवः सम्पूर्णः ।

Proofread by Mohan Chettoor

*Annapurna Stava*

pdf was typeset on September 4, 2022

Please send corrections to *sanskrit@cheerful.com*